ऐं ५ रक्ते रक्ते महारक्ते चामुण्डेश्वरी अवतर २ स्वाहा श्रीनेत्रदूत्यै-नेत्रत्रयाय वौषट् ।

ऐं ५ गुह्यकुब्जिके ह्रों क्षौं ह्रः फट् क्षफ्रें हूं २ एणं हूं ३ फट् मम सर्वो-पद्रवान् यन्त्र-मन्त्र-तन्त्रं चूर्णय २, प्रयोगादिकानान्येन कृतान् कार-यितान् करिष्यमाणान् सर्वान् हन २ मथ २ मर्दय २ दंष्ट्राकरालि फ्रें ह्रीं हूं फट् गुह्यकुब्जिके अस्त्रदूत्यै-अस्त्राय फट् । षड्दूतीन्यासात् शस्त्रक्षयकामनार्थमिदं बलिं गृहण २ स्वाहा । खादकास्त्रेण शिरसि अस्त्रेण भ्रमणम् ।

।। इति षड्दूतीन्यास: ।।

६—रत्नपञ्चक-न्यास:—

हृदये—'ऐं ५ वागीश्वरी ग्लूं'— रत्नगगनलोकभोगगर्भगामिनी गगन-लोकामृतसञ्चारिणी - गगनानन्ददेव - गगनाम्बा-चतु:षष्टिलक्ष-कोटि सिद्ध-चतु:षष्टिलक्षकोटि योगिनीपादुकां पूजयामि ।

नाभौ—'ऐं ५ माया स्लूं'—रत्नस्वर्गलोकभोगगर्भगामिनी स्वर्गलोका-मृतसञ्चारिणी स्वर्गानन्ददेव-स्वर्गाम्बा-द्वात्रिंशल्लक्षकोटिसिद्ध द्वात्रिंशल्लक्षकोटियोगिनीपादुकां. ।

लिङ्गे—'ऐं ५ मोहिनी क्लीं फ्लुं'—रत्नपवनलोकभोगगर्भगामिनी पवन लोकामृतसञ्चारिणी पवनानन्ददेव-पवनाम्बा-षोडशलक्षकोटि-सिद्धषोडशलक्षकोटियोगिनीपादुकां. ।

गुह्ये—'ऐं ५ ज्ञाना म्लूं'—रत्नमर्त्यलोक-भोगगर्भगामिनी-मर्त्यलोका-मृतसञ्चारिणी मर्त्यानन्ददेव मर्त्याम्बा-अष्टलक्षसिद्ध-अष्टलक्ष-कोटियोगिनीपादुकां. ।

बीजे—'ऐं ५ ह्रीं गायत्री ह्रीं न्लूं'—रत्ननागलोकभोगगर्भगामिनी नाग-लोकामृतसञ्चारिणी - नागानन्ददेव - नागाम्बा-चत्वारिंशल्लक्ष-कोटिसिद्ध चत्वारिंशल्लक्षकोटियोगिनीपादुकां. ।

शिर:स्थाने–'ऐं ५ ह्रीं न्लुं'–इन्द्रनीलानन्तलोक-भोगगर्भगामिन्यनन्तलोका-मृतसञ्चारिण्यनन्तानन्ददेवानन्ताम्बाऽनन्त-लक्षकोटि-सिद्धानन्त लक्षकोटियोगिनीपादुकां. ।

रत्नपञ्चकन्यासात् शोकसन्तापक्षयकारकमिदं बलिं गृहण २ स्वाहा ।

।। इति रत्नपञ्चकन्यास: ।।

સમ્પ્રીતિર્મહાતેજાઃ પવ્રુદ્ધ સનાતનઃ।
જયતાડ્ડાનબીનાચો વેદવેદ્યો મહામતિઃ॥
ankurnagpal108@gmail.com

नवात्मन्यास: —

'ऐं ५ हसं'-अङ्गुष्ठाभ्यां नमः । '५ क्षमं'-तर्जनीभ्यां स्वाहा । '५ लवं'-मध्यमाभ्यां वषट् । '५ रं यं' अनामिकाभ्यां हुम् । '५ यं ॐ'-कनिष्ठिकाभ्यां वौषट् । '५ अं ऊं'-अस्त्राय फट् ।

।। इति करन्यासः ।।

हृदयादिन्यासः—

'५ हसं'-हृदयाय नमः । '५ क्षमं'-शिरसे स्वाहा । ५ लवं शिखायै वषट् । ५ रं यं कवचाय हुं । ५ यं ॐ नेत्रत्रयाय वौषट् । ५ अं ऊं अस्त्राय फट् ।

।। इति हृदयादिन्यासः ।।

छोटिकान्यासः:—

५ हं-शिखायां पादुकां । ५ सं-शिरसि पादुकां । ५ क्षं-ललाटे पादुकां ।
५ मं-मुखमण्डले ,, । ५ लं-हृदि ,, । ५ वं-नाभौ ,, ।
५ रं-गुह्ये ,, । ५ यं-जान्वोः ,, । ५ ॐ पादद्वये ,, ।
५ अं-अस्त्राय फट् सर्वाङ्गे पादुकां पूजयामि ।

।। इति नवात्मन्यासः ।।

अघोरास्त्रन्यासः—

ऐं ५ ह्लां ह्लीं ह्लौं-प्रस्फुर प्रस्फुर-हृदयाय नमः ।
ऐं ५ घोरघोरतरतनुरूप-शिरसे स्वाहा ।
ऐं ५ चट चट प्रचट प्रचट-शिखायै वषट् ।
ऐं ५ कह कह वम वम-कवचाय हुं ।
ऐं ५ दंश दंश घातय घातय-नेत्रत्रयाय वौषट् ।
ऐं ५ विद्यालय विद्यालय भिन्दि भिन्दि हूं ३ फट् टट-अस्त्राय फट् ।

।। इति अघोरास्त्रन्यासः ।।

द्वात्रिंशद्वर्णन्यासः—

ऐं शिखायाम् । व-शिरसि । ज्र-ललाटे । कु-दक्षिणनेत्रेपा. ।
श्ज-वामनेत्रे । के-नासिकायाम् । हस्फ्रें-मुखे । त्रै-दक्षिणकर्णे ।
लो-वामकर्णे । क्या-चिबुके । क-कण्ठे । षि-हृदि ।
णि-दक्षिणस्तने । ह्लीं-वामस्तने । का-दक्षिणपार्श्वे । मां-वामपार्श्वे ।
ग-नाभौ । द्रा-लिङ्गमूले । वि-अण्डयोः । णि-पायौ ।
क्लीं-दक्षिणोरौ । स्त्री-वामोरौ । म-दक्षिणजानौ । हा-वामजानौ ।

श्री–दक्षजङ्घायाम् । भ–वामजङ्घायाम् । का–दक्षगुल्फे ।
गि–वामगुल्फे । णि–दक्षपादे । ऐं–वामपादे । सौः–दक्षपादाङ्गुलिषु ।
सः–वामपादाङ्गुलिषु ।

॥ इति द्वात्रिंशद्वर्णन्यासः ॥

एकाक्षरीन्यासः–

ऐं ५ क्लीं–नासायां पादुकां० । ५ हं–मुखे पादुकां० । ५ सं–दक्षनेत्रे पा. ।
५ खं–वामनेत्रे पादुकां० । ५ फं–ललाटनेत्रे पा. । ५ रं–शिरसि पा. ।
५ ऐं–कर्णद्वये ,, । ५ ॐ पादद्वये पा. ।

॥ इत्येकाक्षरीन्यासः ॥

त्रिविद्यान्यासः–

ऐं ५ शिवतत्त्वाधिकारे स्हौं परायै–शिरसे स्वाहा ।
ऐं ५ आत्मतत्त्वाधिकारे ऐं ह्रीं ह्रं ह्रौं स्हौं फट् अपरायै-हृदयायनमः ।
ऐं ५ विद्यातत्त्वाधिकारे अघोरे ह्रीं परमघोरे हूं घोररूपे हः घोरमुखी भीमा भीषणी वम २ पिब २ रुरु २ रर २ फट् स्हौं हुं फट् परापरायै– गुह्ये ।
ऐं ५ ह्सूं त्रिविद्यान्यासाय बलिं गृह्ण २ स्वाहा ।

॥ इति त्रिविद्यान्यासः ॥

घोराष्टकन्यासः–

ऐं ५ ह्रीं रु अघोरे ह्रीं स्हौं अघोरायै नमः–शिरसि स्वाहा ।
५ ह्रीं रु परमघोरे हूं स्हौं परमघोरायै नमः–मुखस्थाने ।
५ ह्रीं रु घोररूपे हः स्हौं घोररूपायै नमः–हृदये ।
५ ह्रीं रु घोरामुखी स्हौं घोरमुख्यै नमः — नाभौ ।
५ ह्रीं रु फट् भीमे स्हौं भीमायै नमः — दक्षभुजे ।
५ ह्रीं रु हूं भीषणे स्हौं भीषण्यै नमः — वामभुजे ।
५ ह्रीं रु हूं हः वम स्हौं वमनायै नमः– दक्षोर्वादिपादाङ्गुल्यन्तम् ।
५ ह्रीं रु फट् पिब हे स्हौं पिबनायै नमः–वामोर्वादि पादाङ्गुल्यन्तम् ।
५ घोरिकाष्टकाय बलिं गृह्ण २ स्वाहा ।

॥ इतिघोराष्टकन्यासः ॥

रुद्रखण्डन्यासः (प्रथमत्रिखण्डन्यासः)–

ऐं ५ नमो भगवति रुद्रायै फें — पादाङ्गुष्ठयोः ।

अ-शिखायाम् । घो-शिरसि । रे-ललाटे । ह्लां-दक्षिणनेत्रे । थ-वामनेत्रे । घो-नासिकायां । रे-मुखे । ह्लीं-द. कर्णे । घो-वामकर्णे । र-चिबुके । घो-कण्ठे । र-हृदि । त-द. स्तने । रे-वामस्तने । ह्लूं-द. पार्श्वे । फ-वाम-पार्श्वे । स-नाभौ । र्वे-लिङ्गमूले । स-अण्डयोः । र्वे-पायौ । श-दक्षिणोरौ । र्वे-वामोरौ । फे-दक्षिणजानौ । ह्लैं-वामजानौ । जूं-दक्षजङ्घायाम् । मः-वामजङ्घायाम् । ह्लौं-दक्षगुल्फे । रु-वामगुल्फे । द्र-दक्षपादे । रू-वामपादे । पे-दक्षपादांगुलिषु । ह्लः-वामपादांगुलिषु । आसन. वज्रमण्डले । ऐं ५ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः—वज्रमण्डले वज्रिणि अमोघे महाघोरे गगनविशुद्धे शोधय शोधय, हूं फट् वज्रासन-पादुकां. सूर्यमण्डले— ऐं ५ ह्सीं ह्सौं मार्तण्डमण्डलशोधनी तेजस्विनी हूं फट् ह्सौं ।

अथ ग्रन्थिन्यासः—

ऐं ५ हं—अनन्तग्रन्थिग्रन्थ्यै नमः—पादुकां पूज० त०			पादयोः
५ हां — कालग्रन्थि	,,	,,	गुल्फयोः
हिं रुद्रग्रन्थि	,,	,,	जङ्घाद्वये
हीं —अष्टग्रन्थि	,,	,,	ऊरुद्वये
हुं—वामग्रन्थि	,,	,,	कटिद्वये
हूं कामग्रन्थि	,,	,,	लिङ्गस्याग्रे
हृं — पिण्डग्रन्थि	,,	,,	मेढ्रस्थाने
हॄं—ब्रह्मग्रन्थि	,,	,,	ब्रह्मस्थाने
हॢं सूर्यग्रन्थि	,,	,,	नाभिमध्ये
हॣं —सोमग्रन्थि	,,	,,	नाभौ
हें—प्राणग्रन्थि	,,	,,	उदरे
हैं—जीवग्रन्थि	,,	,,	हृदये
हों - विष्णुग्रन्थि	,,	,,	कण्ठे
हौं— रुद्रग्रन्थि	,,	,,	तालुमध्ये
हं - ईश्वरग्रन्थि	,,	,,	शिरसि
हः—सदाशिवग्रन्थि	,,	,,	मूर्ध्नि

इति ग्रन्थिन्यासभट्टारिकायाः पादुकाग्रन्थिन्यासात् सहोदरवधमहा-पातकनाशनमिदं बलिं गृह्ण २ स्वाहा ।

२—अघोरन्यासः —

५ अघोरे ह्लां-हृदयाय नमः पादुकां. । ५ घोरे ह्लीं-शिरसे स्वाहा । ५ घोरे घोरतरे ह्लूं-शिखायै वषट् । ५ सर्वशर्वे ह्लैं-कवचाय हुं ।

५ जूं सः ह्रौं-नेत्रत्रयाय वौषट् । ५ नमस्ते रुद्ररूपे ह्रः-अस्त्राय फट् । अघोरे अघोरादिन्यासात् महापातकनाशनमिदं बलिं गृह्ण २ स्वाहा । इति अघोरन्यासः ।

अथ षडङ्गन्यासः —

५ स्हां सर्वज्ञता शक्तिधाम्ने-हृदयाय नमः । ५ स्हीं-अमृततेजोमालिनी नित्यतृप्तिशक्तिधाम्ने शिरसे स्वाहा । ५ स्हूं-अवेदवेदअनादिन्यादि-शक्तिधाम्नेशिखायै वषट् । ५ स्हैं-वज्रिणी वज्रधारा स्वतन्त्रधाम्ने-कवचाय हुं । ५ स्हौं-सहस्रतेजसात्मिके नित्यमलुप्तशक्तिधाम्ने-नेत्रत्रयाय वौषट् । ५ स्हः-अनन्तशक्तिधाम्ने-अस्त्राय फट् । ५ नफल-वरयीं-षडङ्गन्यासाय बलिं गृह्ण २ स्वाहा । षडङ्गन्यासात् महा-व्याधिनाशनमिदं बलिं गृह्ण २ स्वाहा । इति षडङ्गन्यासः ।

३—मालिनी-न्यासः

ऐं ५	नं	नादिन्यै	नमः	शिखायां पादुकां पूजयामि,	तर्पयामि
५	थं	ग्रसन्यै	,,	अर्धशिरोमालायां	,,
५	ॠं	निवृत्त्यै	,,	पूर्व ,,	,,
५	ॠं	प्रतिष्ठायै	,,	दक्षिण ,,	,,
५	ऌं	विद्यायै	,,	उत्तर ,,	,,
५	ॡं	क्षान्त्यै	,,	पश्चिम ,,	,,
५	चं	चामुण्डायै	,,	तृतीयनेत्रे	,,
५	धं	प्रियदर्शन्यै	,,	नेत्रयोः	,,
५	णं	नारायण्यै	,,	कर्णयोः	,,
५	उं	मोहिन्यै	,,	दक्षिणकर्णभूषणे	,,
५	ऊं	प्रज्ञायै	,,	वाम ,,	,,
५	इं	गुह्यावत्यै	,,	नासापुटयोः	,,
५	वं	वज्रिण्यै	,,	वक्त्रे	,,
५	कं	कटकटायै	,,	दंष्ट्रयोः	,,
५	खं	कालिकायै	,,	ऊर्ध्वदन्तपंक्तौ	,,
५	गं	शिवायै	,,	अधो ,,	,,
५	घं	घोरघोरायै	,,	ऊर्ध्वोष्ठे	,,
५	ङं	खिविरायै	,,	अधरोष्ठे	,,
५	ईं	मायादेव्यै	,,	जिह्वायां	,,
५	अं	वागीश्वर्यै	,,	वाचि	,,

Scanned by CamScanner

५ वं शिखिवाहिन्यै नमः कण्ठे पादुकां पूजयामि, तर्पयामि
५ भं भीषण्यै ,, द० स्कन्धे ,,
५ यं वायुवेगायै ,, वाम ,, ,,
५ डं लामायै ,, दक्षिणबाहुदण्डे ,,
५ ढं विनायक्यै ,, वाम ,, ,,
५ ठं पूर्णिमायै ,, करतलद्वये ,,
५ झं झंकार्यै ,, दक्षिणहस्तांगुलिषु ,,
५ ञं कुर्दनायै ,, वाम ,, ,,
५ जं जयन्त्यै ,, मेरुदण्डसन्धौ दक्षिणहस्ते ,,
५ रं दीपिन्यै ,, शूलदण्ड-दक्षिणहस्ते ,,
५ टं कपालिन्यै ,, कपाले ,,
५ पं पावन्यै ,, हृन्मध्ये ,,
५ हं अम्बिकायै ,, प्राणाधारे ,,
५ सं सर्वात्मन्यै ,, दक्षिणपार्श्वे ,,
५ अः इच्छाशक्त्यै ,, वाम ,, ,,
५ छं छागल्यै ,, दक्षिणस्तने ,,
५ लं पूतनायै ,, वामस्तने ,,
५ आं आमोटन्यै ,, पादद्वये ,,
५ षं लम्बोदर्यै ,, उदरे ,,
५ क्षं संहारिण्यै ,, नाभिमध्ये ,,
५ मं महाकाल्यै ,, नितम्बे ,,
५ णं कुसुमायुधायै ,, गुह्ये ,,
५ शं शुक्रादेव्यै ,, शुक्रे ,,
५ तं तारादेव्यै ,, ऊरुद्वये ,,
५ एं ज्ञानशक्त्यै ,, दक्षिणजानौ ,,
५ ऐं क्रियायै ,, वाम ,, ,,
५ ओं गायत्र्यै ,, दक्षिणजङ्घायाम् ,,
५ औं सावित्र्यै ,, वाम ,, ,,
५ दं दहन्यै ,, दक्षिणपादे ,,
५ फं फेत्कारिण्यै ,, वामपादे ,,
५ [illegible]–मालिनीन्यासाद् गोहत्या–महापातकनाशनमिमं
[illegible] २ स्वाहा ।

॥ इति मालिनीन्यासः ॥

Scanned by CamScanner

शब्दराशिन्यासः —

ऐं ५ अं श्रीकण्ठाय नमः ललाटे पादुकां पूजयामि, तर्पयामि ।

५	आं	अनन्तमण्डलाय नमः		वक्त्रे	,,
५	इं	सूक्ष्मीशाय	,,	द. नेत्रे	,,
५	ईं	त्रिमूर्तीशाय	,,	वामनेत्रे	,,
५	उं	अमरेशाय	,,	द. कर्णे	,,
५	ऊं	अर्घीशाय	,,	वामकर्णे	,,
५	ऋं	अनिर्थीशाय	,,	द. नासायां	,,
५	ॠं	भारभूतीशाय	,,	वामनासायां	,,
५	लृं	स्थाणवे	,,	दक्षगण्डे	,,
५	लॄं	हराय	,,	वामगण्डे	,,
५	एं	भण्टीशाय	,,	अधोदन्तपंक्तौ	,,
५	ऐं	भूतीशाय	,,	ऊर्ध्व ,,	,,
५	ओं	सद्योजाताय	,,	अधरोष्ठे	,,
५	औं	अनुग्रहीशाय	,,	ऊर्ध्वोष्ठे	,,
५	अं	क्रूरेशाय	,,	तालुमध्ये	,,
५	अः	महासेनाय	,,	जिह्वायाम्	,,
५	कं	क्रोधीशाय	,,	द. स्कन्धे	,,
५	खं	चण्डाय	,,	दक्षबाहुदण्डे	,,
५	गं	प्रचण्डाय	,,	दक्षिणहस्तमणिबन्धे	,,
५	घं	शिवाय	,,	दक्षहस्ते	,,
५	ङं	एकरुद्राय	,,	दक्षहस्तांगुलिषु	,,
५	चं	कूर्माय	,,	वामस्कन्धे	,,
५	छं	एकनेत्राय	,,	वामबाहुदण्डे	,,
५	जं	चतुर्मुखाय	,,	वामहस्तमणिबन्धे	,,
५	झं	अजेशाय	,,	वामहस्ते	,,
५	ञं	सर्वेशाय	,,	वामहस्ताङ्गुलिषु	,,
५	टं	सोमेश्वराय	,,	द. स्फिचि	,,
५	ठं	लाङ्गलीशाय	,,	द. ऊरौ	,,
५	डं	दारुकाय	,,	द. जानौ	,,
५	ढं	अर्धनारीशाय	,,	द. जङ्घायाम्	,,
५	णं	उमाकान्ताय	,,	द. पादे	,,
५	तं	आषाढीशाय	,,	वामस्फिचि	,,

ankurnagpal108@gmail.com

५ नमश्चामुण्डायै फें — पादतलयोः ।
५ नमश्चाकाशमातृभ्यः फें — पादद्वये ।
५ नमः सर्वकामार्थसाधकेभ्यः फें — गुल्फद्वये ।
५ नमोऽजरामरेभ्यः फें — जङ्घयोः ।
५ नमः सर्वत्राप्रतिहतगतिभ्यः फें — जान्वोः ।
५ नमः स्वरूपपररूपपरिवर्तिभ्यः फें — ऊर्वोः ।
५ नमः सर्वसत्त्ववशीकरणाच्छादनोन्मूलनसमस्तकर्म-प्रवर्त्तिभ्यः फें — योनौ ।
५ नमः सर्वमातृगुह्यहृदयपरमसिद्धाय फें — नाभौ ।
५ नमः परकर्मच्छेदनकर सं सिद्धिकराय फें — गुह्ये ।
५ नमो मातॄणां वचनं शुभं फें — उपस्थे ।

।। इति रुद्रन्यासः ।।

मातृखण्डन्यासः—

५	अघोरे	अमोघे	वरदे विमले	श्रीब्रह्माणि	विच्चे	पादुकां०	हृदि ।
५	,,	,,	,,	श्रीमाहेश्वरि	,,	,,	कण्ठे
५	,,	,,	,,	श्रीकौमारि	,,	,,	तालुमध्ये
५	,,	,,	,,	श्रीवैष्णवि	,,	,,	मुखे
५	,,	,,	,,	श्रीवाराहि	,,	,,	नासिकायाम्
५	,,	,,	,,	श्रीऐन्द्राणि	,,	,,	कोदण्डे
५	,,	,,	,,	श्रीचामुण्डे	,,	,,	अर्धचन्द्रे
५	,,	,,	,,	श्रीमहालक्ष्मि	,,	,,	शिरोबिले

।। इति मातृकान्यासः ।।

[illegible] त्रिखण्डान्यासः—

ॐ ५ नमश्चामुण्डायै फें — ललाटे । ५ ऊर्ध्वकेशि फें – केशे ।
५ ज्वलितशिखे फें – शिखायाम् । ५ विद्युज्जिह्वे फें – जिह्वायाम् ।
५ तार्क्ष्याक्षि फें – नेत्रत्रये । ५ पिङ्गलभ्रुवे फें – भ्रूयुगले ।
५ विकृतदंष्ट्रे फें – दन्तपंक्तौ । ५ क्रुद्धे क्रुद्धे फें – ओष्ठयोः ।
५ मांसशोणितसुरासवप्रिये फें – जिह्वायाम् । ५ हस,हसफें-तालुमध्ये
५ नृत्य नृत्य फें – बाहुद्वये । ५ जये जये फें – कण्ठग्रन्थौ ।
५ मायात्रैलोक्यरूपसहस्रपरिवर्तिनि फें – कण्ठकूपे ।
५ [illegible] फें – हृदि मध्ये । ५ कूट २ फें – नाभौ ।

५ चिरि चिरि फ्रें – नितम्बे । ५ हिरि हिरि फ्रें –कटयाम् ।
५ मिरि मिरि फ्रें – उपस्थलिङ्गे । ५ छिद छिद फ्रें –गुह्ये ।
५ त्रासिनी फ्रें— दक्षिणोरौ । ५ भ्रामिणी फ्रें —वामोरौ ।
५ विद्राविणी २ फ्रें—उपस्थे । ५ क्षोभिणी २ फ्रें — दक्षजानुनि ।
५ मार २ फ्रें - वामजानुनि । ५ सञ्जीवय २ फ्रें—दक्षजङ्घायाम् ।
५ हेरि २ फ्रें - वामजङ्घायाम् । ५ गोरि - २ फ्रें - दक्षिणगुल्फे ।
५ घुरि २ फ्रें - वामगुल्फे । ५ घुरिणे २ फ्रें - दक्षिणपादे ।
५ नमो मातृगणेभ्यः – वामपादे । ५ चामुण्डे वरदे विच्चे - पादाङ्गुष्ठयोः ।

।। इति मन्त्रखण्डे त्रिखण्डान्यासः ।।

बीजपञ्चकन्यासः—

ऐं ५ अं-ललाटे । ५ इं-कण्ठे । ५ उं-मुखे । ५ एं-गुह्ये । ५ ओं-पादद्वये ।

इति बीजपञ्चकन्यासः ।

पादादिषट्कन्यासः—

ऐं ५ छां छीं महत्तारिकायै ह्रौं ग्लूं कलाध्व सां सीं सूं समलवरयूं-विशुद्धसाकिन्यै प्रकृतिपुरि खड्गीशानन्ददेव पादुकां पूजयामि A-कण्ठे ।

ऐं ५ घोरे अघोरे अघोरामुखि बहुरूपायै ह्रौं ग्लूं मन्त्राध्व कां कीं कूं कमलवरयूं-अनाहतकाकिन्यै गुणपुरि विश्वानन्ददेव पादुकां पूजयामि-हृदि ।

ऐं ५ ह्लां ह्लीं ह्लूं वरवरशिखे ह्लूं ग्लूं वर्णाध्व लां लीं लूं लमलवरयूं-मणिपूरकलाकिन्यै महापुरि झिण्टीशानन्ददेव पादुकां पूजयामि-नाभौ ।

ऐं ५ हस्फ्रें कुब्जिकायै कुलदीपायै ह्रीं ग्लूं पदाध्व-रां रीं रूं रमलवरयूं-स्वाधिष्ठाने राकिन्यै धीपुरि अनुग्रहीशानन्ददेव पादुकां पूजयामि-लिङ्गे ।

ऐं ५ नमो भगवति हृत्कमलायै ह्रां ग्लूं भुवनाध्व डां डीं डूं डमलवरयूं-आद्याडाकिन्यै मनः पुरि मित्रानन्ददेव पादुकां पूजयामि-गुदे उपस्थमूले ।

A-मूलाधार इति ।

Scanned by CamScanner

ऐं ५ किणि किणि विच्चे कोङ्कणायै ह्ः क्लूं तत्त्वाध्व हां ह्रीं ह्रूं हमल-वरयूं-आज्ञाहाकिन्यै पुम्पुरि अखण्डीशानन्ददेव पादुकां पूजयामि-भ्रूमध्ये ।

ऐं ५ यां यीं यूं यमलवरयूं-शिरोबिले याकिन्यै यक्षपुरि कौलीशानन्ददेव पादुकां पूजयामि-ललाटे ।

इति पादादिषट्कन्यासः ।

पञ्चक्रमकालिका

(उत्तराम्नाये)

अस्य श्रीपञ्चक्रमकालिका-षोढान्यासमन्त्रस्य हां सदाशिव ऋषिः, बृहतीच्छन्दः, ह्सौं शिव शक्तिः, समरसनिर्वाणदेवता, खं बीजं, ह्लीं शक्तिः, स्फें कीलकं, मम सर्वसिद्धिसाधने विनियोगः ।

यथाक्रमं ऋष्यादिन्यासः—

'ॐ स्फें ह्लीं' अं आं महाचण्डयोगेश्वरि अं आं-अङ्गुष्ठभ्यां नमः ।

" इं ईं रिश्वगेयो ड चं हाम इं ईं-परमप्रचण्डयोगे०तर्जनीभ्यां नमः ।

" उं ऊं कालरात्रि योगेश्वरि उं ऊं-मध्यमाभ्यां नमः ।

" एं ऐं ड चं हां महामायायोगेश्वरि एं ऐं-अनामिकाभ्यां नमः ।

" ओं औं उन्मत्तचण्डाग्रयोगेश्वरि ओं औं-कनिष्ठिकाभ्यां नमः ।

" अं अः नरमुण्डमहामारि अं अः करतलकरपृष्ठाभ्यां नमः ।

" अं अः रिश्वगेयो ड चं हाम अं अः--अस्त्राय फट् ।

अथ व्यापकम् ॐ स्फें ह्लीं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः ।

ॐ नमः परमशिव विपरीताचार 'रहक्षमल वर यूं' महाभैरव-काल निपूदनमहाकालग्रास मुख ह्रां ह्रीं खाहि खाहि, भुङ्क्ष्व २ कालि कालि, महाकालि २ ह्रां ह्रां ह्रां ह्रां हासिनि रह रयां हंस हंस हंस २ हंसी हंसः ह्रीं [illegible] श्रीपादुकां-हृदयाय नमः ।। १ ।।

ॐ ह्रीं स्फें कं ५ ॐ नमः सदाशिवाय ह्सौः भगवते हां एह्येहि, [illegible] सर्वशत्रुनिषूदनाय क्षमलवरयूं ह् लीं ब्रह्म शिरसे स्वाहा । [illegible] खं ३ व्योमरूपे सत्ये ध्रुवे गुह्येक्षां ३ रक्ष श्रीं क्षां क्षः [illegible] स्वाहा ।। २ ।।

ॐ ह्रीं स्फ्रें चं छं ५ ॐ ह्रीं रहक्ष मलवरयीं ह् स ख फ्रां हस फ्रीं-चण्डकपालिनि देवि हूँ ज्वल २ प्रज्वल २ हिन्ति २, छिन्ति २, भिन्ति २, ग्रन्थान् गृहण २ नमः रजमलीं जृम्भिते स्तम्भिते मोहिते ऐं ग्लूं चर्चिते जूं सं जम्भय जम्भय, परमचण्डे शीघ्रमानय २, ॐ ह्रीं महोच्छुष्मे रहरक्षमीं भगवच्छक्त्यै शिखायै वौषट् ।। ३ ।।

ॐ ह्रीं स्फ्रें टं ५ ॐ ह्रीं भीम भीम भीषण भगवति एह्येहि मातर्देवि तर २ तुरु २ प्रस्फुर प्रस्फुर हूं ह्रीं मेघमाले महामायेश्वरि विद्युत्कटाक्षे क्ष्म्रीं क्षां क्षीं क्षूं क्षपित-दुरिते स्वरूपे विरूपे ज्वलितमुखि चण्डेश्वरि हट्ट २ वज्रायुधधारिणि हन २ हूं डामरमुखि ह् स् फ्रां ह् स् फ्रीं वज्रशरीरं कुरु २ कवचाय हुं ।। ।। ४ ।।

ॐ ह्रीं स्फ्रें तं ५ ॐ वज्रमध्ये फट् ॐ हूं फट् महाकिरातचाण्डाले अवतर २ आवाहेन मुखे क्ष्लं भण्डीरय डं ४ वज्रसारमुखे द्रीं जहि २, कालि २, कालविध्वंसिनि, हूं क्ष्लं ह् क्लौं रफ्रें फट् नेत्रत्रयाय वौषट् ।। नेत्रत्रयेण ।। ५ ।।

ॐ स्फ्रें ह्रीं ५ आगच्छ २ हूं ३ चक्रराजेश्वरि महाशब्दं तर २ रा व् ह् लों ज्वल २ महारौद्रिणि कालानलं पत २ तापय २ कट्ट २ दह २ घोराचारे महाघोरे वाडवाग्नि ग्रस ग्रस रक्ष्रीं ज्वालय २ रफ्रें हर यैः हरयः अस्त्राय फट् ।। अस्त्र० ।। ६ ।।

ॐ स्फ्रें ह्रीं यं १० ॐ नमो महाबलाय नमो रुद्राय ह् स् ख् फ्रें महाचण्डे तेजःसङ्कर्षणि कालिमन्थाने रक्ष्रीं रक्ष लह फ्रें रक्ष्रूं फ्रां ब्रह्मरन्ध्रतः पादान्तम् श्रीपादुकां पूजयामि ।। मूलं ।। मूर्ध्नि ।। ७ ।।

इति उग्रमातृक्रमन्यासः ।

अथ कालीकुलक्रमन्यासः—

ॐ स्फ्रें फ्रें अं फि फां महासृष्टिकाली श्रीपादुकां पूजयामि शिरसि ।

ॐ स्फ्रें फ्रें	आं	फि फां	महास्थितिकाली		मुखे ।
,,	इं	,,	महासंहारकाली	,,	दक्षनेत्रे ।
,,	ईं	,,	महा-अनाख्याकाली	,,	वामनेत्रे ।
,,	उं	,,	महाभासाकाली	,,	दक्षकर्णे ।
,,	ऊं	,,	महाज्ञानकाली	,,	वामकर्णे ।

'ॐ ल्फें फें'	ॠं	'फि फां'	महासूर्यकाली	श्रीपादुकांपूजयामि	दक्षिणनासापुटे
,,	ॠं	,,	महासोमकाली	,,	वामनासापुटे
,,	लृं	,,	महाज्ञानानन्दकाली	,,	दक्षगण्डे
,,	लॄं	,,	महाज्ञानप्रभाकाली	,,	वामगण्डे
,,	एं	,,	महानभःकाली	,,	ऊर्ध्वोष्ठे
,,	ऐं	,,	महाक्षीवकाली	,,	अधरे
,,	ओं	,,	महार्चिष्काली	,,	ऊर्ध्वदन्तपङ्क्तौ
,,	औं	,,	महाकेतुकाली	,,	अधोदन्तपङ्क्तौ
,,	अं	,,	महाकुल्लीशकाली	,,	तालुमूले
,,	अः	,,	महापाशुपतकाली	,,	जिह्वायां
,,	कं	,,	महातापनीकाली	,,	दक्षबाहुमूले
,,	खं	,,	महा-नराशनीकाली	,,	दक्षकूर्परे
,,	गं	,,	महा-ऋक्षकाली	,,	वामकूर्परे
,,	घं	,,	महासिद्धकाली	,,	दक्षाङ्गुलिमूले
,,	ङं	,,	महाऋद्धिकाली	,,	दक्षांगुल्यग्रे
,,	चं	,,	महादंष्ट्रिणीकाली	,,	वामबाहुमूले
,,	छं	,,	महामन्त्रदाकाली	,,	वामकूर्परे
,,	जं	,,	महाज्वालिनीकाली	,,	वाममणिबन्धे
,,	झं	,,	महामन्त्रसिद्धिकाली	,,	वामाङ्गुलिमूले
,,	ञं	,,	महागणेश्वरीकाली	,,	वामाङ्गुल्यग्रे
,,	टं	,,	महामायाकाली	,,	दक्षपादमूले
,,	ठं	,,	महानित्याकाली	,,	दक्षजानुनि
,,	डं	,,	महाशान्तिकाली	,,	दक्षगुल्फे
,,	ढं	,,	महाविद्याकाली	,,	दक्षपाङ्गुलिमूले
,,	णं	,,	महानन्दिनीकाली	,,	दक्षपादाङ्गुल्यग्रे
,,	तं	,,	महा-उमाकाली	,,	वामपादमूले
,,	थं	,,	महानन्दश्रीनन्दकाली	,,	वामजानुनि
,,	दं	,,	महाबलकाली	,,	वामगुल्फे
,,	धं	,,	महानन्दनन्दिनीकाली	,,	वामाङ्गुलिमूले
,,	नं	,,	महासुभगानन्दिनीकाली	,,	वामाङ्गुल्यग्रे
,,	पं	,,	महालक्ष्लीकाली	,,	दक्षपार्श्वे

Scanned by CamScanner

ॐ स्फ्रें फ्रें फं फिं फां			महासिद्धिलक्ष्मीकाली श्रीपादुकां.		वामपार्श्वे
,,	बं	,,	महाकुब्जिकाकाली	,,	पृष्ठे
,,	भं	,,	महाविश्वलक्ष्मीकाली	,,	नाभौ
,,	मं	,,	महाजयावहाकाली	,,	जठरे
,,	यं	,,	महाश्रीकाली	,,	हृदये
,,	रं	,,	महासुन्दरीकाली	,,	दक्षांशे
,,	लं	,,	महात्रिपुराकाली	,,	ककुदि
,,	वं	,,	महाचण्डडामरीकाली	,,	वामांसे
,,	शं	,,	महा महापूर्णेश्वरीकाली	,,	हृदयादिदक्षहस्तान्ते
,,	षं	,,	महानैःश्रेयसीकाली	,,	हृदयादिवामहस्तान्ते
,,	सं	,,	महाराजेश्वरीकाली	,,	हृदयादिदक्षपादान्ते
,,	हं	,,	महादुर्गाकाली	,,	हृदयादिवामपादान्ते
,,	वं	,,	महाभैरवकाली	,,	हृदयादिपादाङ्गुलिपर्यन्ते
,,	क्षं	,,	महामेलापकाली	,,	हृदयादिब्रह्मरन्ध्रपर्यन्ते

(एताः "पादुकां पूजयामि" इत्यन्तेन मातृकास्थाने विन्यसेत् ।)

श्व फर ऐ म म ह आ च ण ड य ओ ग ए श व र ई श्रीपादुकायै नमः ।। इति मातृक्रमः ।। २ ।।

अथ कालीकुलक्रमः—

ॐ स्फ्रें ह्लीं फिं फां अं आं १६ कं खं ३५ महागुह्यकालिके ह्लीं मातः फ्रें प्रपञ्चरूपायें म ए र फ ख महाचण्डयोगेश्वरी-श्रीपादुकायै नमः ।। व्यापकं कुर्यात् ।

अथ पीठन्यासः—

ॐ स्फ्रें ह्रीं फ्रें श्रीं अं आं इं-सिद्धियोगिनी-महाराविणीपीठस्थे, सिद्धिकालि, महार्चचिके परातिपर गुह्य मङ्गलाशक्ति-श्रीपादुकायै नमः भ्रूमध्ये ।। १ ।।

ॐ स्फ्रें ह्लीं फ्रें श्रीं ईं उं ऊं-ओड्डियान-महापीठस्थे महाचण्डयोगेश्वरी कालकाली छिप्पिणी गुह्याढ्यगुह्यातिगुह्यपरापराशक्तिश्रीपादुकायै नमः ।। वक्त्रे ।। २ ।।

ॐ स्फ्रें ह्रीं फ्रें श्रीं ऋं ॠं लृं-जालन्धरपीठस्थे महाचण्डकापालिनी कालान्तककाली धीवरी गुह्यान्तरान्तसशक्तिश्रीपादुकायै नमः ।। ललाटे ।। ३ ।।

Scanned by CamScanner

ॐ ख्फ्रें ह्लीं फ्रें श्रीं लॄं एं ऐं कामरूपपीठस्थे महाचण्डकापालिमहाचण्डराविणी यमान्तककाली जालिनी महाघोर अतिगुह्याढ्यशक्तिश्रीपादुकायै नमः ।। आनने ।। ४ ।।

ॐ ख्फ्रें ह्लीं फ्रें श्रीं ओं औ-पूर्णगिरिमहापीठस्थे पुलिन्दीमहाचण्डयोगिनी कालवञ्चनी परागुह्याढ्यशक्तिश्रीपादुकायै नमः ।। विशुद्धौ—कण्ठे ।। ५ ।।

ॐ ख्फ्रें ह्लीं फ्रें श्रीं अं अः–प्रयागमहापीठस्थे ब्रह्मवती महाचण्डदण्डिनी अतिरहस्य-गुह्याढ्यशक्तियोगिनी श्रीपादुकायै नमः । अनाहते—हृदि ।। ६ ।।

ॐ ख्फ्रें ह्लीं फ्रें श्रीं कं खं गं घं ङं वाराणसीमहापीठस्थे रुद्रवतीमहाचण्डशूलिनी अतिगुह्यस्वात्मयोगिनीशक्तिश्रीपादुकायै नमः । मणिपूरे ।। नाभौ ।। ७ ।।

ॐ ख्फ्रें ह्लीं फ्रें चं छं जं झं ञं कोलापुरमहापीठस्थे महाकैवर्ती गुह्यसिद्धिमहचण्डातिवेगिनी अतिगुह्ययोगिनीशक्तिश्रीपादुकायै नमः ।। स्वाधिष्ठाने लिङ्गे ।। ८ ।।

ऐं ॐ ख्फ्रें ह्लीं फ्रें श्रीं टं ठं डं ढं णं अट्टहासे महापीठस्थे खड्गकी–नारायणवती महाचण्डचक्रिणी अतिगुह्यातिगुह्यकारिणीशक्तिश्रीपादुकायै नमः मूलाधारे ।। ९ ।।

ऐं ॐ ख्फ्रें ह्लीं फ्रें श्रीं तं थं दं धं नं जयन्ती महापीठस्थे कन्दुकी घोणवती महाचण्डाङ्कुशिनी गुह्यातिगुह्यपातालचारिणीशक्तिश्रीपादुकायै नमः ।। पादतलयोः ।। १० ।।

ऐं ॐ ख्फ्रें ह्लीं फ्रें श्रीं पं फं बं भं मं हस्तिनापुरमहापीठस्थे बन्धकी–शक्रवती महाचण्डवज्रिणी अतिगुह्याढ्यव्यक्तकारिणीशक्तिश्रीपादुकायै नमः ।। ऊरौ ।। ११ ।।

ऐं ॐ ख्फ्रें ह्लीं फ्रें श्रीं यं रं लं वं एकाम्रनाथमहापीठस्थे क्षिपणी-शिवदूतिमहाचण्डकर्त्तरीकुलार्णवचारिणी अतिगुह्यवनचारिणीशक्तिश्रीपादुकायै नमः ।। १२ ।।

ऐं ॐ ख्फ्रें ह्लीं फ्रें श्रीं शं षं सं हं ळं देवीकोटमहापीठस्थे कोपवती–अम्बिकाचण्डिकामहाचण्डखड्गिनी अतिगुह्याढ्य-योगेश्वरी-शक्तिश्रीपादुकायै नमः ।। जङ्घयोः ।। १३ ।।

Scanned by CamScanner

ऐं ॐ ख्फें ह्लीं फं श्रीं अं आं १६ करवीरमहापीठस्थे चण्डयोगेश्वरी महागुह्यशक्तिश्रीपादुकायै नमः ।। कण्ठे ।। १४ ।।

ॐ ख्फें ह्लीं फं श्रीं कं खं ३५ राजगृहमहापीठस्थे महासृष्टि-स्थिति-संहार-अनाख्या-भासाकालीकुलमहाचण्डयोगेश्वरी परापरपरमरहस्यकाली-क्रमशक्ति-श्रीपादुकायै नमः व्यापकम् ।। १५ ।।

अथ योगिनीन्यासः--

ॐ ख्फें ह्रीं डां डीं डूं डमलवरयीं महाचण्डकापालिनि कालीविशुद्ध-पीठे षोडशशक्त्यै नमः—कण्ठे ।।

ॐ ख्फें ह्रीं रां रीं रूं रमलवरयीं महाचण्डकापालिनी काली राकिनी मम रक्तधातून् रक्ष रक्ष ह्रीं हूं महाकाली कापालिनी अनाहतपीठस्थद्वादश-शक्त्यै नमः—हृदि ।।

ॐ ख्फें ह्लीं लां लीं लूं लमलवरयीं महाचण्डकापालिनी काली लाकिनी मम मांसधातून् रक्ष रक्ष ह्लीं हूं महाकाली कपालिनी मणिपूर-पीठस्थदशशक्त्यै नमः ।। नाभौ ।।

ॐ ख्फें ह्रीं कां कीं कूं कमलवरयीं महाचण्डकापालिनी काली काकिनी मम मेदोधातून् रक्ष रक्ष, ह्लीं हूं महाकाली कापालिनी स्वाधिष्ठान-पीठ षट्शक्त्यै नमः—लिङ्गे ।।

ॐ ख्फें ह्लीं सां सीं सूं समलवरयीं महाचण्डकापालिनी काली साकिनी मम मांसास्थिधातून् रक्ष रक्ष, ह्लीं हूं महाकाली कपालिनी मूला-धारपीठे चतुष्टयशक्त्यै नमः । गुदे आधारे ।

ॐ ख्फें ह्लीं हां हीं हूं हमलवरयीं महाचण्डकापालिनी काली हाकिनी मम मज्जाधातून् रक्ष रक्ष, ह्लीं हूं महाकाली कापालिनी आज्ञापीठे शक्ति-द्वयाय शक्त्यै नमः । भ्रुवोः ।

ॐ ख्फें ह्लीं यां यीं यूं यमलवरयीं महाचण्ड कपालिनी काली याकिनी मम शुक्रधातून् रक्ष रक्ष, ह्लीं हूं महाकाली कापालिनी व्योमपीठे सर्वशक्तियुक्तायै नमः । सहस्रदले ।

ॐ ख्फें ह्लीं अं आं १६ कं खं ३५ अनन्तकोटि कालिका महासिद्धि-चक्रे योगिनीशक्तियुतायै महागुह्यकाल्यै नमः । इति व्यापकम् ।

इति योगिनीन्यासः

अथ देवता-न्यास: —

ॐ स्फें ह्ली ॐ भगवते रुद्राय जूं स: परमेश्वराय नम: शिरसि
,, सर्वसर्वात्मने चण्डाध्यक्षाय जूं स: परमात्मने नम: ललाटे
,, ह्लां क्षपिततमसे नरसिंहाय जूं स: ज्ञानात्मने नम: नेत्रयो:
,, ह्लौं वीर्यनिर्जित-दिग्वक्त्राय जूं स: धर्माय नम: नासिकायाम्
,, रहरयें-रहरयौ ह्ली तेजश्चण्डाय जूं स: ज्ञानात्मने नम: गण्डयो:
,, वीर्यनिर्जितदिग्वक्त्राय जूं स: वैराग्याय नम: श्रोत्रयो:
,, स्फां स्फीं स्त्रों स: अमृतात्मने जूं स: ऐश्वर्याय नम: स्कन्धयो:
,, रां रां रुं ज्वल २ प्रज्वल २ गीर्वाणमुख्याय जूं स: अधर्मायनम: बाह्वो:
,, ह्लां ह्लीं ज्वालामालिने महाबलाय जूं स: अज्ञानाय नम: कराङ्गुलिषु

ॐ	लां ब्रह्मणे	जूं स:	पार्श्वयो:
,,	वां विष्णवे	,,	नाभौ
,,	रां रुद्राय	,,	जङ्घयो:
,,	यां ईश्वराय	,,	पादयो:
,,	हां सदाशिवाय	,,	पादाङ्गुलिषु
,,	आत्मज्ञानाय	,,	अनाहते
,,	परज्ञानाय	,,	ताल्वो: घण्ट-ललनायाम्
,,	ह्लां अघोराय	,,	बिन्दौ
,,	घोराय	,,	अर्धचन्द्रे
,,	घोररूपाय	,,	नादे
,,	भैरवाय	,, निरोधिकायाम्	भ्रूमध्ये
,,	वीरभद्राय	,, व्यापिन्याम्	थंनलि
,,	ह्सौ: शरभपक्षिराजाय	,, समनायाम्	दक्षिणकपाले
,,	ह्लीं श्रीं बलप्रमथनाय	,, अकुले	वामकपाले
,,	ग्लीं ह्रूं रक्ष्रीं ज्लीं प्रचण्डाय	,, मनोन्मन्याम्	चेतनस्थाने
,,	परमात्मने	,, शाम्भवान्ते	उन्मन्याम्
,,	[illegible]पतिभ्यो	,, उन्मनीनाथं	अङ्गुलिषु
,,	भूतलवासिनीभ्यो	,, षोडशान्ते	शाम्भवनाथं अङ्गुलिषु
,,	[illegible]भैरवाय	,, सूक्ष्मान्ते	षोडशान्तनाथं ,,
,,	[illegible]	,, परान्ते	ह्लूतोनहडन्वने
,,	[illegible]	,, कुले ह्लूतोस	सहस्रदले

ॐ स्फ्रें ह्रीं प्रचण्डचण्ड-महाघोष-भैरवाय मर्द २, मर्दय २, ज्वल २, प्रज्वल २, स्फ्रें ह र क्ष म ल वरयूं र भ्र ह्रीं हूं फें कालनाशक मां रक्ष २ महाप्रचण्डाय भैरवाय जूं सः । व्यापकं कुर्यात् ।

इति देवतान्यासः ॥५॥

अथ मन्त्रन्यासः—

ॐ स्फ्रें ह्रां ह्रीं महाचण्डयोगेश्वरि श्रीं ह्रीं थ्रीं द्वीपिवक्त्राय नमः ब्रह्मरन्ध्रे
ॐ 'स्फ्रें ह्रां ह्रीं' महाचण्डयोगेश्वरि श्रीं ह्रीं थ्रीं सिंहवक्त्राय नमः शिरसि
ॐ 'स्फ्रें ह्रां ह्रीं' ॐ ह्रीं शुष्के ह्स्त्रं फें फेरुवक्त्राय नमः ललाटमध्ये
३ रह्रीं फट् फट् कपिवक्त्राय नमः वामललाटे
३ हूं ह्स्त्रीं रहूं भ्रश्रीं रह्रीं हूं फें फट् ऋक्षवक्त्राय नमः दक्षललाटे
ह्रीं हस्त्रीं रभयीं हूं रजमभ्रीं फें फट् हूं ३ फट् ३ कालीप्रचण्डवक्त्राय नमः नासिकाग्रे
ॐ म्हां स्हां हूं ऐं क्लीं ग्लूं ताक्ष्यवक्त्राय नमः वामगण्डे
३ रह्रीं हं क्षमलवरयीं म्लौं मकराननाय नमः दक्षगण्डे
३ ह सौं क्ष्म्रीं ह्रीं श्रीं ग्लीं ग्लौं गजवक्त्राय नमः वामकर्णे
३ श्लीं क्लीं ह्लीं चण्डकाली ह् यौं हयाननाय नमः दक्षकर्णे
३ नमश्चामुण्डे करङ्कमालिनि करङ्कमालाधारिणि भगवति फ्रां फ्रीं फ्रूं चण्डकपालिनि महाचण्डकालिकायै नमः मूर्ध्नि सहस्रारे
३ ह्रीं फट् महाचण्डभैरवि स्फ्रीं फ्रें फट् रम रवरय मीं फ्रीं फट् रक्ष मखयूं स्फ्रीं महाचण्ड-चण्डेश्वरि कालिकायै नमः मूलाधारे
ह्रीं चण्ड फ्रें कापालिनि ज्भ्रीं रज्रीं महामन्थानभैरवि हूं ३ नमः स्वाधिष्ठाने
३ ॐ ह्रीं क्ष्रीं प्रीं ल्रीं फ्रीं ह्रीं ह्रूं फट् महाभोगकाली श्रीपादुका० मणिपूरे
३ ॐ क्षर भ्र ज म र ल्यूं क्रीं ह्रीं भ्रीं ह्रीं ह्रीं ह्रीं फ्रीं थ्रीं ध्रीं पराकाली श्रीपादुका० । हृदि अनाहते
३ ॐ स्त्रीं ल्रीं स्त्रीं स्रां व्रीं म्रीं क्ष्रीं ब्रां य्रां म्रां हां हां कालिकायै नमः श्रीपादुका०— कण्ठे विशुद्धौ
ॐ ह्रीं छ्रीं ज्फ्रीं यममुखी यमहस्ते क्रीं रस्त्रीं फ्रीं २ फ्रीं फ्रीं रफ्रीं फट् आकाशे कपाले आज्ञायाम्

ॐ फ्रें हृदयाय नमः ॐ सिद्धिकरालि—शिरसे स्वाहा
ॐ ह्रीं छ्रीं हूं शिखायैवषट् ॐ स्त्रीं फ्रें कवचाय हुं
ॐ नमः नेत्रत्रयाय वौषट् ॐ नमः फ्रें स्वाहा अस्त्राय फट्
ॐ फ्रें सिद्धिकरालि दक्षिणवक्त्राय नमः ह्रीं ह्रीं हूं वामवक्त्रायनमः

स्त्री फें नमः स्वाहा, मध्यवक्त्राय नमः ॐ ॐ ॐ शिखास्थाने पादुका०

ॐ फें फें फें हृदयाय नमः फें सि फें—वामकर्णे

फें द्धि फें—दक्षिणकर्णे फें क फें—वामनेत्रे

फें श फें—दक्षिणनेत्रे फें लि फें—दक्षिणनासायाम्

फें ह्रीं फें—वामनासायाम् फें छ्रीं फें—वक्त्रे

फें हू फें—लिङ्गे फें स्त्रीं फें—गुह्ये

फें फें फें—भ्रूमध्ये फें न फें—ब्रह्मरन्ध्रे

फें म फें—शिरसि फें स्वा फें मस्तकात् पादान्तम्

फें हा फें पादात् मस्तकान्तम् नाभौ । ह्रीं हृदये । फें बिन्दौ

ॐ ह्रीं श्रीं फें गुह्यकालिके फट् फें हूं नमः शिरसि

ॐ ऐं ह्रीं श्रीं ॐ फें ख्फें स्ह्रीं फट् गुह्यकालिके हूं ख्फें हूं सिद्धिकराली

ॐ फें स्ह्रीं महाचण्डयोगेश्वरी श्रीपादुकायै० व्यापकम्

अत्र सहस्राक्षरी-शुद्धाया उच्चारणम् ।।

नानया सदृशी विद्या, त्रिषु लोकेषु दुर्लभा ।
कालीकुलसमायाता, सिद्धिदा परमा स्मृता ।।
मपञ्चकं पुरस्कृत्य, निशायां सन्न्यसेत्तु यः ।
अयुतं तु पुरश्चर्याशक्ति - सन्नद्ध - विग्रहः ।।
आज्ञासिद्धिर्भवेन्नूनं, भैरवोऽसौ न संशयः ।
यदि दासकुले जातो, नूनं राजा भवेद् ध्रुवम् ।।
एषा गुह्या परागुह्या, गुह्येऽवतु परापरम् ।
परशिष्ये नैव दद्यात्, देवतामन्त्रमेव च ।।
न श्रावयेन् मन्त्रपूजां, परशिष्येषु कौलिकः ।
प्राणाघाते न वक्तव्यं, सिद्ध्यते गोपनाद् ध्रुवम् ।।
स एव तु महायोगी, भैरवः परमेश्वरः शिवः ।
(ततो रुद्रमन्त्रेण बलिं मांससुरयायुक्तेन दद्यात् ।।)

बलिदान-मन्त्रः—

ह्रीं श्रीं वक्त्रयोगेश्वरि चन्द्रपीठे व्योमकालि मातङ्गिनि, भीमकालि कामरूपिणि सिद्धकालि पूर्णगिरिचन्द्रकालि जालन्धरि चण्डकालि ओड्डि-याणि रक्तकालि सर्वसमयोल्लासं कुरु २, शुद्धिं सुप्रसर २, श्रीप्रसर २,

हैं स ख: ४ खाहि २, हि ४ ह्रीं २ हू २ बाहि २ काहि २ खाहि २ खे २ हूं लां खां २ लां छां हूं वां श्रीं हू ह्री सो: ह्लें ह्लं ह्लू २ हैं फट् नमः स्वाहा ।

इति श्रीकालीकुलार्णवे महातन्त्रे महाश्रीगुह्यकालीदेव्याः महाषोढा सम्पूर्णः ।
शुभमस्तु सर्वदा ।

ॐ फ्रें ख्फ्रें ध्रीं स्त्रीं हस् ख्फ्रें भगवति गुह्यकालि स्वाहा ।

इति गुह्यकालिकादेव्याः कुल्लुका ।

इति उत्तराम्नायः ।

श्रीकुब्जिका-कवचमाला-मन्त्रस्तोत्रम्

देव्युवाच—

हिमाद्रिशिखरे रम्ये, सुखासीनं त्रिलोचनम् ।
तोषयित्वा महाघोरैस्तपोभिरति - दुष्करैः ॥ १ ॥

सर्वज्ञ ! भक्तिसुलभ ! शरणागत - वत्सल ।
विना न्यासेन तपसा, विना ध्यान-जपादिभिः ॥ २ ॥

कथं तुष्टा भवेत् कुब्जा, कुलाकुल-विभेदिनी ।
केन रक्षा भवेन्नॄणां, साधकानां विशेषतः ॥ ३ ॥

वक्तुमर्होऽसि तत्त्वेन, षट्त्रिंशत् कृपामयि ! ।

श्रीभैरव उवाच—

श्रृणु देवि ! प्रवक्ष्यामि, कुब्जिका-कवचं महत् ॥ ४ ॥

यन्न कस्यचिदाख्यातं, तव स्नेहाद् ब्रवीम्यहम् ।
मेरु-सन्तान-सम्भूता, सत्य-प्रस्तारविस्तृता ॥ ५ ॥

शिव-शक्ति-प्रभेदेन, द्वात्रिंशत् कुब्जिका मता ।
वलया षड्विधो मन्त्रो, मन्त्र-प्राणोऽप्यनेकधा ॥ ६ ॥
पुरा नैव मया प्रोक्तं, कवचं श्रृणु सुन्दरि ! ।

विनियोगः—

अस्य श्रीकुब्जिका-मन्त्रकवचस्य त्रिलोचन ऋषिः, अनुष्टुप् छन्दः, श्रीगुह्यकुब्जिका परमेश्वरी देवता, नवात्मा बीजं, समया शक्तिः, बीजं कीलकं, मम श्रीकुब्जिकाप्रसादद्वारा चतुर्विधपुरुषार्थसिद्धयर्थं शरीररक्षणार्थे जपे विनियोगः ।

Scanned by CamScanner

ऋष्यादिन्यासः—

त्रिलोचनर्षये नमः शिरसि, अनुष्टुप्छन्दसे नमः मुखे
श्रीगुह्यकुब्जिका परमेश्वरी देवतायै नमः हृदये
नवात्मबीजाय नमः गुह्ये, समयाशक्तये नमः पादयोः
कीलकाय नमः नाभौ, विनियोगाय नमः सर्वाङ्गे
मूलेन कर-षडङ्गन्यासान् कुर्यात् ।

सृष्टिवज्रकुब्जिका–(पश्चिमाम्नाये)—

देवीं ध्यायेद् वज्रकुब्जां, प्रभाते साधकोत्तमः ।
स्वच्छन्दभैरवयुतां, पञ्चवक्त्रां परां शिवाम् ॥ १ ॥

दिव्यतेजोमयीमम्बां, पश्चिमाम्नाय-मार्गतः ।
पश्चिमाम्नायमाश्रित्य, सम्यगाप्ताक्रमो नरः ॥ २ ॥

स पूजयेदघोराख्यां, कुब्जिकां तु षडाननाम् ।
पञ्चवक्त्रं दशभुजं, त्रिपञ्चनयनोज्ज्वलम् ॥ ३ ॥

गोक्षीरधवलं पूर्वं, दक्षिणे कृष्णसन्निभम् ।
उत्तरे रक्तवर्णं च, पश्चिमे कनकप्रभम् ॥ ४ ॥
ऊर्ध्ववक्त्रं स्फाटिकाभं, प्रत्यालीढपदस्थितम् ।
कपर्दस्थभालचन्द्रं, श्वेताङ्गं सर्पभूषणम् ॥ ५ ॥
नागकुण्डलिनं देवं, गले वासुकिधारिणम् ।
हस्तपादधृतव्यालं, व्यालयज्ञोपवीतिनम् ॥ ६ ॥

स्थूलाङ्गं मुण्डमालाढ्यं, व्याघ्रचर्मावृतं कटौ ।
नानाभरणभूषाङ्गं, डमरुं तर्जनीं मणिम् ॥ ७ ॥
दधानमङ्कुशं खड्गं, वरदं चापि सव्यतः ।
वामे खट्वाङ्गपद्माक्षनागपाशांस्तथैव च ॥ ८ ॥
मुण्डं पात्रं च दधतं, द्वात्रिंशन्मन्त्रबीजकम् ।
वह्नि नाभिस्थिताम्भोजे, वृषभासनसंस्थितम् ॥ ९ ॥

महातेजं महेशानं, सर्वलक्षणसंयुतम् ।
स्वच्छन्दभैरवं देवं, भैरवीं सहसंयुताम् ॥१०॥
परापरकलारूपामूर्ध्वं कुब्जेश्वरीमुखम् ।
पूर्ववक्त्रं तडित्प्रख्यं, सिद्धियोगेश्वरीमतम् ॥११॥
दक्षिणे कालिकावक्त्रमुमाख्यं पश्चिमे मतम् ।
उत्तरे तु महालक्ष्मीमुखं स्फटिकसुप्रभम् ॥१२॥

Scanned by CamScanner

पाशाङ्कुशधनुर्बाण - चन्द्रहास - कपालकम् ।
कपालपात्रमुद्राख्य - वरदाभय - शोभितम् ।।१३।।
दिग्भुजामिन्दुमुकुटां, कुब्जिकेश्वरराधिताम् ।
ईडे सकलसम्पत्त्यै, पश्चिमाम्नाय - देवताम् ।।१४।।

'लमलवरयीं' कुमारी कुब्जिका पातु, मूलाधारकुलं मम ।
'वमलवरयीं'–महती समया पातु, स्वाधिष्ठानं सदा मम ।।१५।।
'रमलवरयीं'–पातु सौदामिनी कुब्जा, मणिपूरं सदा मम ।
'यमलवरयीं'–हंसेश्वरी महाकुब्जा, हृदयं मम रक्षतु ।।१६।।
'कमलवरयीं'–सर्वेश्वरी च या कुब्जा, विशुद्धं परिरक्षतु ।
'ममलवरयीं'–चित्परा कुब्जिका पातु, ममाज्ञाचक्रमन्वहम् ।।१७।।
'हमलवरयीं'–व्योमातीता महाकुब्जा, लम्बिकां पातु मे सदा ।
कुलालिकेति या कुब्जा, ललाटं पातु मेऽनिशम् ।।१८।।
'हसौं'– नीलकुब्जेति या ख्याता, मस्तकं परिरक्षतु ।
सन्तानकुब्जिका पातु, मम मस्तकमन्वहम् ।।१९।।
मन्थानभैरवी कुब्जा, मूर्धानं परिरक्षतु ।
श्मशानभैरवी कुब्जा, बिन्दुस्थानं सदाऽवतु ।।२०।।
अघोरभैरवी कुब्जा, नादस्थाने सदाऽवतु ।
या गुह्यकुब्जिका प्रोक्ता, प्रधाना वलिभाषिणी ।।२१।।
सा योगिनी गणाध्यक्षा, नादान्ते माऽभिरक्षतु ।
बृहत् - कुब्जा महादेवी, कलास्थानं च रक्षतु ।।२२।।
बृहत्तरी च या कुब्जा, कलातीतं सदाऽवतु ।
मम सिद्धि प्रयच्छन्तु, एताः षोडश कुब्जिकाः ।।२३।।
षड्भ्यो मे षडङ्गानि, पातु वीरेन्द्र-वन्दिता ।
चण्डिका चरणं पातु, प्रपदं पातु चर्चिका ।।२४।।
अङ्गुलीर्मालिनी पातु, पातु गुल्फं भगेश्वरी ।
जङ्घां रक्षतु चामुण्डा, जानुनी पातु वेगिनी ।।२५।।
ऊरू रक्तेश्वरी पातु, कटिं पातु कृशोदरी ।
गुह्यं गुह्येश्वरी पातु, नाभिकन्दं नभेश्वरी ।।२६।।

ankurnagpal108@gmail.com

हृदयं पातु चामुण्डा, स्तनौ पातु यशस्विनी ।
रक्तनेत्रा सदा पातु, पार्श्वयुग्मं त्रिलोचना ।।२७।।
वृषणौ पातु मे घोरा, अघोरा च कराङ्गुलीः ।
कुब्जा करतलं पातु, मणिबन्धे च मोहिनी ।।२८।।
उग्रचण्डा प्रकोष्ठे च, कुलचण्डा च कूर्परे ।
पातु मे बाहुमूलं तु, महोग्रचण्डिका सदा ।।२९।।
रक्तप्रिया तथा पातु, हस्तयुग्मं सदा मम ।
स्कन्धिनी स्कन्धमूलञ्च, कण्ठं कामारिवल्लभा ।।३०।।
चिबुकं कौलिनी पातु, मुखं रक्तमुखी मम ।
तारस्वरूपिणी पातु, अधरोष्ठं सदा मम ।।३१।।
बलिनी पातु मे दन्तान्, जिह्वां रक्षतु जिह्विनी ।
चिन्तासंहारिणी पातु, ऊर्ध्वमोष्ठं सदा मम ।।३२।।
हनुं मांसाशिनी पातु, जिह्वामूलं सुराशिनी ।
वह्निगर्भा सदा पातु, नासिकाविवरं मम ।।३३।।
सर्पकुण्डलिनी पातु, सर्वदा श्रवणद्वयम् ।
लोचने लोहिता पातु, मदाघूर्णित-लोचना ।।३४।।
भ्रूमध्यं पान्तु शाँकिन्यो, याकिन्यः पान्तु मस्तकम् ।
भैरवाः पान्तु सर्वाङ्गे, योगिन्यश्चास्थिसन्धिषु ।।३५।।
रोमकूपे च वज्राङ्गी, वज्ररूपा महाबला ।
त्वचं रक्षतु वाराही, पथि रक्षतु पार्वती ।।३६।।
खेचरी गगने पातु, भूचरी पातु भूतले ।
दिवा रक्षतु गायत्री, निशि नक्तञ्चरी च माम् ।।३७।।
दिक्षु दिगम्बरी पातु, सर्वदा पातु शङ्करी ।
पर्वतेषु सदा पातु, मेरुशृङ्गनिवासिनी ।।३८।।
वह्नौ ज्यतिष्मती पातु, विषाद् रक्षतु वासुकी ।
सङ्ग्रामे विजया पातु, शत्रुसंघ्येऽस्थिमालिनी ।।३९।।
जया राजकुले पातु, सभायां नीतिवल्लभा ।
विद्या जागरणे पातु, स्वप्ने पातु हिरण्मयी ।।४०।।
प्रज्ञावती सुषुप्तौ च, तुर्य्यं च विमलाऽवतु ।
निर्वाणरूपिणी पातु, तुर्य्यातीतं ममाऽनिशम् ।।४१।।

[1]रक्ष मां कुब्जिके देवि, रक्ष मां कुब्जिकेश्वरि ।
रक्ष रक्ष महादेवि, अस्मदीयमिदं वपुः ॥४२॥
कुलद्वीपेति विख्याता, कैलाशशिखरालये ।
सा कुब्जिका महामाया, स्थातु श्रीमस्तके मम ॥४३॥

या खर्वेति समाख्याता, गन्धमादनवासिनी । रक्ष मां.....मस्तके ॥४४॥
बिन्दुरूपेति विख्याता, नेहमण्डलवासिनी । ,, ॥४५॥
महोदरीति विख्याता, श्मशानालयवासिनी । ,, ॥४६॥
मादिनीति समाख्याता, अकाराक्षरमालिनी । अं नमः ,, ॥४७॥
ग्रसनीति प्रसिद्धा या, आकाराक्षरमालिनी । आं नमः ,, ॥४८॥
ऋषिवृन्देति या गीता, ऋषिस्था ऋषिमानिता । इं नमः ,, ॥४९॥
प्रतिष्ठेति समाख्याता, प्रतिष्ठास्था प्रतिष्ठिता । ईं नमः ,, ॥५०॥
विद्येश्वरीति या प्रोक्ता, विद्याविद्ये प्रतिष्ठिता । उं नमः ,, ॥५१॥
शान्तेति गीयते या च, शान्तिरूपे प्रतिष्ठिता । ऊं नमः ,, ॥५२॥
चामुण्डेति प्रसिद्धा या, प्रसिद्धाख्या प्रतिष्ठिता । ऋं नमः ,, ॥५३॥
वशिनीति समाख्याता, वशिन्यपि प्रतिष्ठिता । ॠं नमः ,, ॥५४॥
नारायणीति विख्याता, नारायणसमहिता । लृं ,, ,, ॥५५॥
मोहिनीति समाख्याता, मोहिनीं प्रति संस्थिता । ॡं ,, ,, ॥५६॥
प्रशस्तिरिति या गीता, प्रशस्तिस्था प्रतिष्ठिता । एं ,, ,, ॥५७॥
गुहाशक्तिरिति ख्याता, गुह्यस्था परिकीर्तिता । ऐं ,, ,, ॥५८॥
मन्त्रनीति-प्रसिद्धा या, मन्त्ररूपा प्रतिष्ठिता । ओं नमः ,, ॥५९॥
त्रिकूटेति समाख्याता, त्रिकूटप्रतिसंस्थिता । औं नमः ,, ॥६०॥
कालिकेति प्रसिद्धार्था, कलिरूपेण संस्थिता । अं नमः ,, ॥६१॥
शम्भुना बिन्दुरूपस्था, बिन्दुरूपा प्रकीर्तिता । अः नमः ,, ॥६२॥
विसर्गाक्षर-मालिन्यां, शिवेति कथिता च या । नमः ,, ॥६३॥
मञ्जुघोषेति या प्रोक्ता, ककाराक्षरमालिनी । कं नमः ,, ॥६४॥
ऐङ्कारी चैव या प्रोक्ता, विश्वयोनिरितीरिता । खं नमः ,, ॥६५॥
महामायेति विख्याता, विश्वमाया प्रतिष्ठिता । गं नमः ,, ॥६६॥
वागीश्वरीति विख्याता, वागीशत्वे प्रतिष्ठिता । घं नमः ,, ॥६७॥
शिखिवाहेति विख्याता, शिखिरूपा प्रतिष्ठिता । ङं नमः ,, ॥६८॥
बिभीषणीति विख्याता, बिभीषण-प्रतिष्ठिता । चं नमः ,, ॥६९॥

---

१. इदं पद्यद्वयं ४२, ४३ संख्यात्मकं सर्वत्र योज्यम् ।

वायुवेगेति या गीता, वायुसंस्था-प्रतिष्ठिता । छं नमः ,, ॥७०॥
कुलमालेति विख्याता, कुलस्था कुलमार्गणी । जं नमः ,, ॥७१॥
विनायकेति विख्याता, विनायके प्रतिष्ठिता । झं नमः ,, ॥७२॥
पूर्णिमेति प्रसिद्धा या, पूर्णिमायां प्रतिष्ठिता । ञं नमः ,, ॥७३॥
शुभकरीति विख्याता, शुभदा सुप्रतिष्ठिता । टं नमः ,, ॥७४॥
क्रोधिनीति समाख्याता, क्रोधस्था च प्रतिष्ठिता । ठं नमः ,, ॥७५॥
दीपिनी त्रिपुरा गीता, दीपिताङ्गी सुसंस्थिता । डं नमः ,, ॥७६॥
जयन्तीति समाख्याता, जयं देहि जयप्रदा । ढं नमः ,, ॥७७॥
कपालिनीति या गीता, कपालस्था शुभप्रदा । णं नमः ,, ॥७८॥
भवानीति समाख्याता, भवरूपा प्रतिष्ठिता । तं नमः ,, ॥७९॥
अम्बिकेति समाख्याता, अम्बिका परिसंस्थिता । थं नमः ,, ॥८०॥
सर्वात्मिकेति विख्याता, सर्वस्था सर्वरूपिणी । दं नमः ,, ॥८१॥
इच्छेति या समादिष्टा, इच्छायां सम्प्रतिष्ठिता । धं नमः ,, ॥८२॥
छागलीति च या गीता, छागस्था सुप्रतिष्ठिता । नं नमः ,, ॥८३॥
पूतनेति प्रसिद्धा या, पूतस्था पूतसंस्थिता । पं नमः ,, ॥८४॥
अमोघेति च विख्याता, अमोघे या प्रतिसंस्थिता । फं नमः ,, ॥८५॥
लम्बोदरीति विख्याता, लम्बनाना प्रतिष्ठिता । बं नमः ,, ॥८६॥
संहारिणीति विख्याता, संहारप्रतिसंस्थिता । भं नमः ,, ॥८७॥
महाकालीति विख्याता, महाकाल-प्रतिष्ठिता । मं नमः ,, ॥८८॥
कुसुमेति प्रसिद्धा या, कुसुमे सुप्रतिष्ठिता । यं नमः ,, ॥८९॥
शुक्लेश्वरीति या प्रोक्ता, शुक्लस्था प्रतिसंस्थिता । रं नमः ,, ॥९०॥
सबलेति च या गीता, बलस्थेति प्रतिष्ठिता । लं नमः ,, ॥९१॥
या चोग्रतारका प्रोक्ता, तारस्था प्रतिसंस्थिता । वं नमः ,, ॥९२॥
ज्ञानशक्तिरिति ख्याता, ज्ञानस्था प्रतिसंस्थिता । शं नमः ,, ॥९३॥
क्रियाशक्तिरिति ख्याता, क्रियास्थान-प्रतिष्ठिता । षं नमः ,, ॥९४॥
गायत्रीति प्रसिद्धा सा, गायत्री वेदमातृका । सं नमः ,, ॥९५॥
सावित्रीति समाख्याता, सारभूता समाश्रिता । हं नमः ,, ॥९६॥
सरस्वतीति विख्याता, शारदा प्रतिसंस्थिता । ळं नमः ,, ॥९७॥
मालिनीति कुलाध्यक्षा, क्षकाराक्षर-मालिनी । क्षं नमः ,, ॥९८॥

ब्रह्माणी पूर्वतः पातु, अग्निकोणे महेश्वरी ।
कौमारी दक्षिणे स्थातु, वैष्णवी स्थातु नैरृते ॥९९॥
वाराही पश्चिमे पातु, इन्द्राणी वायुमण्डले ।
उत्तरे स्थातु चामुण्डा, लक्ष्मीरीशानकोणके ॥१००॥

ऊर्ध्वदेशे च चक्राङ्गी, अधोभागे च नागिनी।
सर्वतः पातु विश्वेशी, सर्वदा मां कपालिनी ॥१०१॥

विद्याराजेश्वरी प्रोक्ता, सर्वविद्यादिदेवता।
सा कुब्जिका महामाया, करोति मम चिन्तितम् ॥१०२॥

या वीरयोगिनी प्रोक्ता, वीराणां सिद्धिदायिनी।
रक्ताम्बिकेति या प्रोक्ता, बलिरक्तप्रिया समा ॥१०३॥

या कामविजया प्रोक्ता, सर्वकामार्थसिद्धिदा।
महोच्छिष्टेति विख्याता, महाज्वर-विनाशिनी ॥१०४॥

धर्मदेवीति या प्रोक्ता, सर्वधर्म-विवर्द्धिनी।
महोत्तरीति विख्याता, महामृत्युविनाशिनी ॥१०५॥

सर्वेशी च प्रसिद्धा सा, सर्वस्फोटकनाशिनी।
सा कुब्जिका महामाया, स्थातु श्रीमस्तके मम ॥१०६॥

कामोल्लासेति विख्याता, सर्वैश्वर्यप्रदायिनी। साकुब्जिका....मस्तके मम।१०७
मातङ्गीति प्रसिद्धा या, सर्वलोकवशङ्करी। ,, ॥१०८॥
पौर्णमासीति या प्रोक्ता, सर्वमङ्गलदायिनी। ,, ॥१०९॥
शाम्भवींति च या प्रोक्ता, सर्वशास्त्रप्रबोधिनी। ,, ॥११०॥
पञ्चकेति समाख्याता, सुरद्रुम-निवासिनी। ,, ॥१११॥

महोक्षा मस्तकं पातु, गुह्या गुह्यं सुरक्षतु।
गोवरा हृदयं मम पातु, रम्भा पातु मम स्तनौ ॥११२॥

शुभा पातु मम श्रोत्रे, साकिनी पातु सृक्किणी।
काकिनी नाभिकुण्डञ्च, लाकिनी पातु जानुनी ॥११३॥

राकिनी चरणौ पातु, इडां मे पातु डाकिनी।
हाकिनी पिङ्गलां पातु, सुषुम्नां कुलकुब्जिका ॥११४॥

मित्रा रक्षतु मे गात्रं, चर्चिका पातु मे वपुः।
सृष्टीश्वरी च पृष्ठं मे, बोधिनी सर्वसन्धिषु ॥११५॥

तीव्रास्थीनि च मे पातु, कौलिनी पातु नाडिका।
इच्छा रक्षतु मे पुत्रान्, ज्ञानं विद्या ममावतु ॥११६॥

क्रिया रक्षतु मे भार्य्यां, कुब्जिका पातु मां सदा।
ज्येष्ठा रक्षतु सर्वस्वमनुज्येष्ठा च मे श्रियम् ॥११७॥

द्वात्रिंशदक्षराभिज्ञा, महाविद्याधिदेवता।
सा कुब्जिका महादेवी, निर्वाणं मेऽभिरक्षतु ॥११८॥

इदं हि कवचं पुण्यं, मेरुसन्तानसम्भवम् ।
यः पठेत् परया भक्त्या, तस्य शत्रुभयं कुतः ॥११९॥

त्रिकालमेककालं वा, यः पठेच्च सुसिद्धिदम् ।
तस्य हस्तगता सिद्धिर्नान्यैश्च जपकोटिभिः ॥१२०॥

इदं तु कवचं गुह्यं, पश्चिमादिमुखे निशि ।
दीपे देवीं समाराध्य, जपेदष्टोत्तरं शतम् ॥१२१॥

प्रसन्ना कुब्जिका तस्य, ददाति फलमीप्सितम् ।
रसं रसायनं खण्डं, गुटिकामञ्जनं जयम् ॥१२२॥

अणिमाद्यष्टसिद्धीश्च, पादुकासिद्धिमेव च ।
सर्वं ददाति सन्तुष्टा, कुब्जिका साधकस्य वै ॥१२३॥

इदं तु कवचं देवि, वज्रेणापि न हन्यते ।
त्रिरावृत्त्या तु सप्ताहाद्, बन्धनान्मुच्यते नरः ॥१२४॥

कवचस्यास्य माहात्म्यं, मया वक्तुं न शक्यते ।
कुब्जिकाऽपि महादेवी, तथा जानाति वा न वा ॥१२५॥

एतत्परतरं देवि ! कुब्जा - कवचमुत्तमम् ।
कथितं यन्मया ज्ञातं, गोपनीयं प्रयत्नतः ॥१२६॥

कवचेनावृतो यस्तु, यत्र कुत्रापि सञ्चरेत् ।
न जातु जायते तस्य, भूत-प्रेतादिजं भयम् ॥१२७॥

महारक्षाकरं देवि ! महाभयविनाशनम् ।
महाज्वर - निवारणं, महादारिद्र्य - नाशनम् ॥१२८॥

सर्वपाप - विनिर्मुक्तं, सर्वैश्वर्य - प्रदायकम् ।
सर्वकाम - प्रदं देवि, सर्वव्याधि - निवारणम् ॥१२९॥

ग्रहापस्मार - कुष्ठादि - विष - सर्पादि - भञ्जनम् ।
